National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 313-314
© 2025 NJHSR
www.sanskritarticle.com

**श्री डि. श्रीनिवासरावः**
शोधच्छात्रः, शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**श्री डि. श्रीनिवासरावः**
शोधच्छात्रः, शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# महाभारतस्य आदिपर्वणि परामर्शकविषयकांशानाम् अध्ययनम्

**श्री डि. श्रीनिवासरावः**

**भूमिका –**

परामर्शशब्दः प्रायशः तार्किकैः अनुमानप्रमाणे उपयुज्यते। व्याप्तिविशिष्टपक्षधर्मता ज्ञानं परामर्शः इति तल्लक्षणमपि वदन्ति। लोके दुःखार्तं कमपि आश्वसयितुं द्वितीयः सान्त्वन वचनानि वदति, सोऽपि परामर्शशब्देन व्यवह्रियते। इदं चार्थद्वयं विद्याबोधनेपि संगच्छते। विद्यार्थिनः शङ्कां वारयितुं तत्सन्देहस्य अत्र अवकाशः वर्तते वा न वा इति परामर्शकः परामृशति। तत् स्थितिं निरुप्य विद्यार्थिनः सन्देहं समस्यां वा अपनोदितुं शक्नोति। एवं लौकिके अर्थेऽपि समस्या ग्रस्तं विद्यार्थिनं आश्वासयन् किमयं महान् विषयः इति आश्वाश्च विषयविभागेन तस्य सन्देहान् अपनुद्य नष्टमोहं करोति। एवं लौकिके, शास्त्रीयेऽपि अर्थे परामर्श शब्दस्य यौगिकार्थ विमर्शनं करणीयम्।

महाभारते एवं विधाः बहवः समस्याः दृष्टाः एव यथा दुष्यन्तोपाख्याने लोकापवादात् भीतः दुष्यन्तः परिचित पूर्वामपि स्वभार्यां शकुन्तलां तिरस्करोति। यद्यपि तत्र शकुन्तला समस्यया आक्रान्ता तथापि दुष्यन्तस्य संस्करणेन समस्या परिष्कृता भवति इति शकुन्तला परामर्शिकी विश्वसिति। प्रथमं असत्य भाषणे दोषं निरूप्य साक्षिणः अभावेपि अदृष्टाः दशाधिकाः साक्षिणः भवन्त्येव इति शास्त्रियं प्रमाणं निर्दिशति। सन्दिग्धे दुष्यन्ते परामर्शिकायाः शकुन्तलायाः सत्यसन्धतां वीक्ष्य देवाः एवं समस्यां परिष्कृतवन्तः। एवं प्रत्येकं समस्यायां एषोऽर्थः अन्वितो भवत्येव।

**परीक्षित् शापवृत्तान्तः समस्या कथनम्**

**(A) प्रस्तावना-**

महाभारतश्रवणे जनमेजयस्य मनसःशान्तिरेव लाभः जातः। मनसः शान्ते नाशकारणं सर्पयागः एवाभवत् तादृशस्य सर्पयागस्य जनमेजयेन अनुष्ठाने कारणं परीक्षितः शाप एव भबूव। जनमेजयस्य पिता परीक्षित् कदाचित् मृगयार्थी वनं जगाम। तदानीमेव कलियुगप्रवेशोऽभूत, कलिरपि परीक्षिता शिक्षितः दमितश्च। एवं धार्मिकोऽपि परीक्षित् विधिवशात् अधर्ममाचरितवान् मृगयार्थी मृगमनुसरन् सैन्याद्रूरं गतः परीक्षित् शमीकस्य आश्रमं प्रविश्य तत्र समाधिस्तं शमीकं जलं ययाचे। महर्षिः समाधिस्थितः तस्यागमनं ज्ञातवान्। तत् कुपितः परीक्षित् सर्पकलेबरं शमीकस्य कण्ठे निक्षिप्य गतवान्। शमीकस्य पुत्रः शृङ्गी(शृङ्ग्री) परीक्षित् निर्गमनान्तरमागतः सप्तदिनाभ्यन्तरे तक्षकेण दष्टः मृतो भविष्यति इति परीक्षितं शशाप।

**शापजन्या समस्या-** परीक्षित् स्वभावेन धार्मिकः किन्तु विधिचोदितः तदा तथा कृतवान् तदुक्तं भगवता वेदव्यासेनैव सभापर्वणि-

**असम्भवे हेममयस्य जन्तोस्तथापि रामो लुलभे मृगाय।**
**प्रायः समासन्नपराभवाणां धियो विपर्यस्ततरा भवन्ति॥**[1]

एवं विपर्यस्त मतिः परीक्षित् ऋषिकण्ठे सर्पं चिक्षेप। यदि शृङ्गी पितुः पराभवं तावन्मात्रं सोढुं समर्थः तदा समस्या नोत्पन्ना भवेदेव। शमीकः एव शृङ्गिणः कोपात् उत्पन्नां समस्यां विस्तरेण विवृतवान्। राज्यम् अराजकं भवति परीक्षित् न्यायमार्गेण लोकम् अनुशास्ति वयं राजभिः रक्षिताः तेषां पापे अस्माकमपि भागो भवत्येव।

**न्यायतो रक्षितास्तेन तस्य शापं न रोचये।**
**सर्वथा वर्तमानस्य राज्ञो ह्यस्मद्विधैः सदा॥**
**क्षन्तव्यं पुत्रधर्मो हि हतो हन्ति न संशयः।**
**यदि राजा न संरक्षेत्पीडा न परमा भवेत्॥[2]**

शिक्षाशास्त्रे परामर्शस्य क्रोधनियन्त्रणमपित्यपि प्रयोजनरूपं दृष्टम् (Management to Anger) शमीकः चतुर्दशश्लोकैः ) ( $\frac{41}{20 \text{ to } 33}$ ) शृङ्गिणः कोपं नियन्त्रितुं यत्नं कृतवान्। तथापि निष्फलयत्नः एव बभूव। शृङ्गी शापं निवर्तयितुम् अहं न शक्तवान् इति स्पष्टं उवाच। ततः शमीकोऽपि शृङ्गिणं त्वया सत्वगुणवृद्धिः साधनीया इति अनुशशास।

**स त्वं शमपरो भूत्वा वन्यमाहारमाचरन्।**
**चर क्रोधमिमं हत्वा नैवं धर्मं प्रहास्यसि॥**
**क्रोधो हि धर्मं हरति यतीनां दुःखसंचितम्।**
**ततो धर्मविहीनानां गतिरिष्टा न विद्यते॥[3]**

**व्याख्याविश्लेषणम्-**

शृङ्गी शापं निवर्तयितुम् अशक्तः शमीकोऽपि सत्यवचसा पुत्रेण दत्तं शापं पुत्रस्य तपः आधिक्यात् शापं निवर्तयितुमशक्तः शमीकः स्वयं शान्तत्वात् परीक्षितस्य दुष्कर्मफलं न्यूनीकृत्य आमुष्मिकप्रयोजन प्रदानेन तं तारयितुं कृतनिश्चयः।

**मया तु शममास्थाय यच्छक्यं कतुर्मद्य वै।**
**तत्करिष्याम्यहं तात प्रेषयिष्ये नृपाय वै॥[4]**

गौरमुखनामकं शिष्य परीक्षितः अन्तिकं प्रेषयामास। राजानं सर्वं सन्दिश्य जागरूको भव इत्यादिदेश। राजापि सर्वताभद्रं एकस्तम्भं प्रासादं अधिरुह्य भिषजः औषधानि च सन्निधाप्य मानवयत्नेन आत्मानं रक्षितु ययते। श्रीशुकः सप्तदिनानि परीक्षितं श्रीमद्भागवतमुपदिश्य मुक्तं चकार इति कथा श्रीमद्भागवते दृश्यते।

**परिचर्चा-**

शृङ्गी परीक्षितं शप्तवान् शमीकोपि पुत्रदत्तं शापं निवर्तयितुमशक्तः, राजापि महता प्रयत्नेन आत्मरक्षां कर्तुं कृतयत्नोपि विफलोऽभूदिति ज्ञात्वा जनमेजयोऽपि शान्तो भवितुमर्हति। तथापि तक्षककृत काश्यपनिवर्तनं परीक्षित् मरणकारणमभवदिति महाभारते स्पष्टम्। काश्यपो नाम ब्राह्मणः तक्षकविषमपि उपसंहर्तुं प्रभवति तक्षकेण दृष्टे राजनि तं पुनः जीवितं कृत्वा परीक्षितः धनं लभेयम् इत्याशया हस्तिनपुरं प्रस्थितः। मार्गे सः तक्षकेण दृष्टः तक्षकोपि तस्मै ब्राह्मणाय अभिलषितं धनं दत्वा निवर्तयामास। काश्यपोऽपि परीक्षितं क्षीणायुषं ज्ञात्वा धनं गृहीत्वा निवव्रते। तक्षकः ब्राह्मणानुशासनं पालयित्वापि स्वविषनिवर्तनेन अन्यशो भवेदिति मत्वा काश्यपं निवर्तयामास। तस्मादेव कारणात् तक्षकायकुपितः जनमेजयः सर्पयागेन ईजे। सोऽपि यागः आस्तिकेन ब्राह्मणेन मध्ये निवारितः।

**अध्येयसारः-**

परामर्शदाता शमीकः एव। स च पुत्रम् अनुनीय शापं निवर्तयितुं कृतयत्नः। स्वयं च तपस्सम्पन्नोऽपि शापं निवर्तयितुमशक्तः।

**तत्र रक्षां कुरुष्वेति पुनः पुनरथाऽब्रवीत्।**
**तदन्यथा न शक्यं च कर्तुं केनचिदप्युत॥**
**न हि शक्नोति तं यन्तुं पुत्रं कोपसमन्वितम्।**
**ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना॥[5]**

विधिचोदितः परीक्षित् आत्मरक्षां विधीयापि दैवोपहतं आत्मानं रक्षितुं न शशाक। काश्यपः ब्राह्मणोऽपि धनलुब्धः तक्षकवचनानुसारी बभूव इति तत्त्वचिन्तकोऽपि सः प्रजाभ्यः द्रुह्यति इति स्पष्टम्। स्वार्थवशात् कदाचिदपि लोकक्षेमात् प्रमत्तो न भवेदिति काश्यपकथा निरूपयति।

सत्वगुणेन लोकक्षेमं कर्तुं प्रभवति अनालोचितदुष्कार्येभ्यः आत्मानं निवर्तयितुं प्रभवति इति परामर्शदातुः वाक्येषु परामृष्टं शृङ्गिणं प्रति कृते उपदेशे परामर्शलक्ष्यं स्पष्टीकृतम्। लोकहितकाङ्क्षया शमीकप्रवृत्तिः इति लौकिकम् पुत्रं प्रति कृतः परामर्शः इति वैयक्तिकं च। प्रथमं शृङ्गिणः कोपादेव शप्तः इति शृङ्गिणः कोपोपशमनाय शमीकेन सत्वगुणवृद्धये परामृष्टः इति दिशानिर्देशकत्वात् (Directive counselling) निर्देशात्मकपरामर्शः भवति। शमीकेन कृतः उपदेशः शृङ्गिणः जीवितसंस्काराय उपकरोति इति। जीवनपरामर्शः (carrier counselling) एकम् उद्दिश्य कृतोऽपि उपदेशः न केवलं तस्यैव मनसः चिकित्सकः किन्तु सर्वदा सर्वैः अनुष्ठितं मनसः स्वास्थ्याय उपकारको भवतीति मनोचिकित्सात्मकपरामर्शः।(psychotherapeutic counselling)

**अनुप्रयोगः-**

महाभारते परीक्षित्-शृङ्गि-शमीकप्रसङ्गे शमीकमुनिः परामर्शदाता (Counsellor) तथा शृङ्गिः परामर्शग्राही (Counselee) भवति। शृङ्गिणः मुख्यसमस्या तीव्रक्रोधः, भावनानियन्त्रणस्य अभावः, आवेगपूर्णनिर्णयः, परिणामानाम् अविचारः तथा पश्चात्तापः च अस्ति। शमीकमुनिः तस्य क्रोधं शमयितुं क्षमायाः, धर्मस्य, विवेकस्य, कर्मफलस्य च विषये तर्कयुक्तं मार्गदर्शनं ददाति। शृङ्गिणः समस्या आधुनिकमनोविज्ञानस्य संज्ञानात्मकसिद्धान्तेन (Cognitive Theory) सह सम्बद्धा अस्ति, यतः व्यक्तेः चिन्तनं तस्य भावनां व्यवहारं च प्रभावितं करोति। अतः शमीकमुनेः मार्गदर्शने आधुनिक संज्ञानात्मकपुनर्रचना (Cognitive Restructuring), क्रोधनियन्त्रणम् (Anger Management),भावनानियमनम्(Emotional Regulation) इत्यादीनां प्रविधयःदृश्यन्ते।

**अद्यतनसमाजे उपयोगिता (Application in Present Society)**

वर्तमानसमाजे छात्राणां क्रोधे, पारिवारिककलहेषु, दाम्पत्य-विवादेषु, कार्यक्षेत्रीयसंघर्षेषु,सामाजिकमाध्यमसम्बद्धविवादेषु तथा आवेगपूर्ण-निर्णयेषु प्रयोजयितुं शक्यन्ते। अतः शमीकमुनेः मार्गदर्शनं क्रोधनियन्त्रणस्य, भावनानियन्त्रणस्य, विवेकपूर्णनिर्णयस्य च आधुनिकपरामर्शतत्त्वैः सह तुलनां कर्तुं योग्यं भवति।

**सन्दर्भग्रन्थसूची-**

1.महाभारतम्-सभापर्व-76/5
2.महाभारतम्-आदिपर्व-41/21,22
3.महाभारतम्-आदिपर्व-42/7,8
4.महाभारतम्-आदिपर्व-42/11
5.महाभारतम्-आदिपर्व-42/21,22